# श्री गणेश अथर्वशीर्ष

**। श्री गणेशाय नमः ।**

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।।

ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्योऽअरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।।

ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि ।

त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ।

त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि ।

त्वं साक्षादात्मासि नित्यम् ।।१।।

ॐ ऋतं वच्मि । सत्यं वच्मि ।।२।।

ॐ अव त्वं माम् । अव वक्तारम् ।

अव श्रोतारम् । अव दातारम् । अव धातारम् ।

अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् ।

अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् ।

अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ।।३।।

ॐ त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः ।

त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।

त्वं ज्ञानमयो विज्ञानमयोऽसि ।।४।।

ॐ सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।

सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।

त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ।।५।।

ॐ त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः ।

त्वं देहत्रयातीतः । त्वं कालत्रयातीतः ।

त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः ।

त्वां योगिनो ध्यायन्ति नित्यम् ।

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं

सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम् ।।६।।

ॐ गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः ।

अर्धेन्दुलसितं । तारेण रुद्धम् । एतत्तव मनुस्वरूपम् ।

गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।

बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेशविद्या ।

गणक ऋषिः। निचृद्गायत्री छंदः । गणपतिर्देवता ।

ॐ गं गणपतये नमः ।।७।।

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्ती प्रचोदयात् ।।८।।

ॐ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।

रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं

रक्तपुष्पैः सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।

आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।

एवं ध्यायति यो नित्यं स योगी योगिनां वरः ।।९।।

ॐ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्ते अस्तु

लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ।।१०।।

## फलश्रुती

ॐ एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते । स पञ्चमहापापात्प्रमुच्यते ।

सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायंप्रातःप्रयुञ्जानोऽपापो भवति ।

सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति ।

इदमथर्वशीर्षम् अशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान् भवति । सहस्रावर्तनात् यं यं काममधीते तं तमनेन साधयेत् ।।११।।

ॐ अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् ।

ब्रह्माद्यावरणं विद्यात् । न बिभेति कदाचनेति ।।१२।।

ॐ यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्यसमिद्भिर्यजति ।

स सर्वं लभते स सर्वं लभते ।।१३।।

ॐ अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते । महापापात् प्रमुच्यते ।

स सर्वविद्भवति स सर्वविद्भवति ।।

य एवं वेद । इत्युपनिषद् ।।१४।।

ॐ तन्माम् अवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ सह नाववतु । सह नौ भुनक्तु। सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु । मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ।।

**। इति श्रीगणपत्यथर्वशीर्षं समाप्तम् ।**